# ॐ आपदुद्धारक स्तोत्रम्

आपदामपहर्तारं दातारं सर्वसम्पदाम्

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

ॐ अस्य श्रीआपदुद्धारक श्रीरामचन्द्रस्तोत्र महामन्त्रस्य वसिष्ठ ऋषिः अनुष्टुप् छन्दः श्रीरामचन्द्रो देवता श्रींबीजं रां शक्तिः मं कीलकं मम श्रीरामचन्द्र प्रसादसिध्यर्थे जपे विनियोगः ।

## ध्यानम्

आर्तनां आर्तिहन्तारं भीतानां भयनाशनम् ।

द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ।

नमः कोदण्डहस्ताय सन्धीकृतशराय च

दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥ आपदां ॥ १

आपन्न जनरक्षैकदीक्षायामित तेजसे

नमोऽस्तु विष्णवे तुभ्यं रामायापन्निवारिणे ॥ आपदां ॥ २

पदाम्भोजरजः स्पर्श पवित्रमुनियोषिते ।

नमोऽस्तु सीतापतये रामायापन्निवारिणे ॥ आपदां ॥ ३

दानवेन्द्र महामत्तगज  पञ्चास्यरूपिणे

नमोऽस्तु रघुनाथाय रामायापन्निवारिणे ॥ आपदां ॥ ४

महीजाकुचसंलग्न कुङ्कुमारुणवक्षसे  ।

नमः कल्याणरूपाय रामायापन्निवारिणे ॥आपदां ॥ ५

पद्मसम्भवभूतेश मुनिसंस्तुतकीर्तये ।

नमो मार्ताण्डवंश्याय रामायापन्निवारिणे ॥ आपदां ॥ ६

हरत्यार्तिं च लोकानां यो वा मधुनिषूदनः

नमोऽस्तु हरये तुभ्यं रामायापन्निवारिणे ॥ आपदां ॥ ७

तापकारणसंसार गजसिंहस्वरूपिणे  ।

नमो वेदान्तवेद्याय रामायापन्निवारिणे ॥ आपदां ॥ ८

रङ्गत्तरङ्ग जलधि गर्वहृच्छरधारिणे ।

नमः प्रतापरूपाय रामायापन्निवारिणे ॥आपदां ॥ ९

दारोपहित चन्द्रावतंस ध्यातस्वमूर्तये ।

नमः सत्यस्वरूपाय रामायापन्निवारिणे ॥आपदां ॥ १०

तारानायकसङ्काशवदनाय महौजसे ।

नमोऽस्तु ताटकाहन्त्रे रामायापन्निवारिणे ॥आपदां ॥ ११

रम्यसानुलसच्चित्रकूटाश्रम विहारिणे

नमः सौमित्रिसेव्याय रामायापन्निवारिणे ॥ आपदां ॥ १२

सर्वदेवाहितासक्त दशाननविनाशिने ।

नमोऽस्तु दुःखध्वंसाय रामायापन्निवारिणे ॥ आपदां ॥ १३

रत्न सानुनिवासैक वन्द्यपादाम्बुजाय च ।

नमस्त्रैलोक्यनाथाय रामायापन्निवारिणे ॥ ॥आपदां ॥ १४

संसारबन्ध मोक्षैकहेतु दामप्रकाशिने ।

नमः कलुषसंहर्त्रे रामयापन्निवारिणे ॥ आपदां ॥ १५

पवनाशुग संक्षिप्त मारीचादिसुरारये ।

नमो मखपरित्रात्रे रमायापन्निवारिणे ॥ आपदां ॥ १६

दाम्भिकेतर भक्तौघ महानन्द प्रदायिने ।

नमः कमलनेत्राय रमायापन्निवारिणे ॥ अपदां ॥ १७

लोकत्रयोद्वेगकर कुम्भकर्णशिरश्छिदे ।

नमः नीरददेहाय रामायापन्निवारिणे ॥ ॥ आपदां ॥ १८

काकासुरैकनयन हरल्लीलास्त्रधारिणे

नमो भक्तैकवेद्याय रामायापन्निवारिणे ॥ आपदां ॥ १९

भिक्षुरूप समाक्रान्त बलिसर्वैकसम्पदे ।

नमो वामनरूपाय रामायापन्निवारिणे ॥ आपदां ॥ २०

राजीवनेत्र सुस्पन्द रुचिराङ्गसुरोचिषे ।

नमः कैवल्यनिधये रामायापन्निवारिणे ॥ ॥ आपदां ॥ २१

मन्दमारुत संवीत मन्दारद्रुमवासिने ।

नमः पल्लवपादाय रामायापन्निवारिणे ॥ आपदं ॥ २२

श्रीकण्ठचापदलन धुरीण बलबाहवे ।

नमः सीतानुषक्ताय रामायापन्निवारिणे ॥ आपदां ॥ २३

राजराजसुहृद्योषार्चित मङ्गलमूर्तये ।

नमः इक्ष्वाकुवंश्याय रामायापन्निवारिणे ॥ आपदां ॥ २४ ॥

मञ्जुलादर्श विप्रेक्षणोत्सुकैक विलासिने ।

नमः पालितभक्ताय रामायापन्निवारिणे ॥ आपदां ॥ २५

भूरिभूधर कोदण्डमूर्ति ध्येयस्वरूपिणे ।

नमोऽस्तु तेजोनिधये रामायापन्निवारिणे ॥ आपदां ॥ २६

योगीन्द्रहृत्सरोजात मधुपाय महात्मने ।

नमो राजाधिराजाय रामायापन्निवारिणे ॥ आपदां ॥ २७

भूवराहस्वरूपाय नमो भूरिप्रदायिने ।

नमो हिरण्यगर्भाय रामायापन्निवारिणे ॥ आपदां ॥ २८

योषाञ्जलिविनुर्मुक्तलाजाञ्जित वपुष्मते ।

नम स्सौन्दर्यनिधये रामायापन्निवारिणे ॥ आपदां ॥ २९

नखकोटि विनिर्भिन्न दैत्याधिपति वक्षसे ।

नमो नृसिंहरूपाय रामायापन्निवारिणे ॥ आपदां ॥ ३०

मायामानुषदेहाय वेदोद्धरण हेतने ।

नमोऽस्तु मत्स्यरूपाय रामयापन्निवारिणे ॥ आपदां ॥ ३१

मितिशून्यमहादिव्यमहिम्ने मानितात्मने ।

नमो ब्रह्मस्वरूपाय रामायापन्निवारिणे ॥ आपदां ॥ ३२

अहङ्कारेतरजनस्वान्त सौधविहारिणे ।

नमोऽस्तु चित्स्वरूपाय रामायापन्निवरिणे ॥ आपदां ॥ ३३

सीतालक्ष्मणसंशोभिपार्श्वाय परमात्मने ।

नमः पट्टाभिषिक्ताय रमायापन्निवारिणे ॥ आपदां ॥ ३४

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

सन्नद्धः कवची खड्गी चापभाणधरो युवा ।

तिष्ठन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥

## फलश्रुति

इमं स्तवं भगवतः पठेद्यः प्रीतमानसः ।

प्रभाते वा प्रदोषे वा रामस्य परमात्मनः ॥ १

स तु तीर्त्वा भवाम्भोधि मापदः सकला अपि

रामासायुज्य माप्नोति देवदेव प्रसादतः ॥ २

कारागृहादि बाधासु सम्प्राप्ते बहुसङ्कटे।
आपन्निवारकस्तोत्रं पठेद्यस्तु यथाविधि॥ ३
संयोज्यानुष्टुभ्यं मन्त्रमनुश्लोकं स्मरन् विभुम्।
सप्ताहा त्सर्वबादेभ्यो मुच्यते नाऽत्र संशयः॥ ४
द्वात्रिंशद्वारजपतः प्रत्यहं तु दृढव्रतः।
वैशाखे भानु मालोक्य प्रत्यहं शतसङ्ख्या॥ ५
धनवान् धनदप्रख्यः स भवे न्नात्र संशयः।
बहुनात्र किमुक्तेन यं यं कमयते नरः॥ ६
तं तं काम माप्नोति स्तोत्रेणानेन मानवः।
यंत्रपूजाविधानेन जपहोमादितर्पणैः॥ ७
यस्तु कुर्वीत सहसा सर्वान् कामा नवाप्नुयात्
इह लोके सुखी भूत्वा परे मुक्तो भविष्यति। ८

इत्यगस्त्यसंहितायां उमामहेश्वरसंवादे आपदुधारकस्तोत्रपटलं नामैकत्रिंशतोध्यायः॥

॥ जै श्रीमन्नारायण॥